सर्वात्मा स आत्मनाऽऽत्मानमनेकधा व्यूह्यावस्थित इति, तन्न निराक्रियते, “स एकधा भवति त्रिधा भवति” इत्यादिश्रुतिभ्यः परमात्मनोऽनेकधा भवस्याधिगतत्वात्। यदपि भगवतोऽभिगमनादिलक्षणमाराधनम् अजस्रमनन्यचित्ततयाऽभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्। यत् पुनरिदमुच्यते वासुदेवात् सङ्कर्षण उत्पद्यते सङ्कर्षणाच्च प्रद्युम्नः,प्रद्युम्नाच्चानिरुद्ध इति। अत्र ब्रूमः, न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञस्य जीवस्योत्पत्तिः सम्भवति, अनित्यत्वादिदोषप्रसङ्गात् उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्, ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्,कारणप्राप्तौ कार्य्यस्य प्रविलयप्रसङ्गात्। प्रतिषेधिष्यति चाचार्य्यो जीवस्योत्पत्तिं “नात्माश्रुतेर्नित्यत्वाच्च” तस्मादसङ्गतैषा कल्पना” भा०।

“न च कर्त्तुः करणम्” सू०।

“इतश्चासङ्गतैषा कल्पना, कस्मान्न हि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते। वर्णयन्ति च भागवताः ‘कर्त्तुर्जीवात् सङ्कर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यते” इति। न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः। न चैवम्भूतां श्रुतिमुपलभामहे” भा०।

“विज्ञानादिभावे वा तदप्रतिषेधः” सू०।

“अथापि स्यान्न चैते सङ्कर्षणादयो जीवादिभावेनाभिप्रेयन्ते किं तर्हि ईश्वरा एवैते सर्वे ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोऽभिरैश्वर्य्यधर्मैरन्विता अभ्युपगम्यन्ते वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्चेति, तस्मान्नायं यथावर्णित उत्पत्त्यसम्भवो दोषः प्राप्नोतीति। अत्रोच्यते, एवमपि तदप्रतिषेध उत्पत्त्यसम्भवस्याप्रतिषेधः प्राप्नोत्येव, अयमुत्पत्त्यसम्भवो दोषः प्रकारान्तरेणेत्यभिप्रायः, कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति, ततोऽनेकेश्वरकल्पनानर्थक्यम्, एकेनैवेश्वरेणेश्वरकार्य्यसिद्धेः। सिद्धान्तहानिश्च भगवानेको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति, तथापि तदवस्थ एवोत्पत्त्यसम्भवः। न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात्। भवितव्यं हि कार्य्यकारणयोरतिशयेन यथा मृद्घटयोः। न ह्यसत्यतिशये कार्य्यं कारणमित्यवकल्पते न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन् सर्वेषु वा ज्ञानैश्वर्य्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते, वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते। न चैते भगवद्व्यूहाश्चतुःसङ्ख्या, ब्रह्मादिस्तम्बपर्य्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्”भा०।

“विप्रतिषेधाच्च” सू०।

“विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः। ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात्। वेदविप्रतिषेधश्च भवति,चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रम् अधिगतवान् इत्यादिवेदनिन्दादर्शनात्, तस्मादसङ्गतैषा कल्पनेति सिद्धम्”भा० जीवस्य वास्तविकोत्पत्तिनिराकरणेन तस्य भाक्तोत्पत्तिमत्त्वं तत्रैव २अ०। ३ पादे समर्थितं यथा

“चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्” सू०

“स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवं जातीयकाल्लौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात् कस्यचिद्भ्रान्तिः, तामपनुदामः, न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसम्बन्धोपपत्तेः। शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्याताम्। श्रूयते च “जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते” इति। ननु लौकिक जन्ममरणव्यपदेशो जीवस्य दर्शितः सत्यं दर्शितं, भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः, किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इति, उच्यते। चराचरव्यपाश्रयः। स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ, स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्य्येते तद्भावभावित्वात्। शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः। नहि शरीरसम्बन्धादन्यत्र जीवो जातो मृतो वा केनचिदुपलक्ष्यते। “स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाण” इति च शरीरसंयोगवियोगनिमित्तावेव